# Amritasanjivani Dhanvantari Stotra 1

# અમૃતસઞ્જીવન ધન્વન્તરિસ્તોત્રમ્ ૧

## Document Information

Text title : amRitasanjIvana dhanvantarI stotra

File name : dhanvantaristotra.itx

Category : vishhnu, stotra, vishnu

Location : doc_vishhnu

Author : Unknown

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : April 5, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 1, 2024

*sanskritdocuments.org*

Amritasanjivani Dhanvantari Stotra 1

# અમૃતસઞ્જીવન ધન્વન્તરિસ્તોત્રમ્ ૧

નમો નમો વિશ્વવિભાવનાય
નમો નમો લોકસુખપ્રદાય ।
નમો નમો વિશ્વસૃજેશ્વરાય
નમો નમો નમો મુક્તિવરપ્રદાય ॥ ૧॥

નમો નમસ્તેઽખિલલોકપાય
નમો નમસ્તેઽખિલકામદાય ।
નમો નમસ્તેઽખિલકારણાય
નમો નમસ્તેઽખિલરક્ષકાય ॥ ૨॥

નમો નમસ્તે સકલાર્ત્રિહર્ત્રે
નમો નમસ્તે વિરુજઃ પ્રકર્ત્રે ।
નમો નમસ્તેઽખિલવિશ્વધર્ત્રે
નમો નમસ્તેઽખિલલોકભર્ત્રે ॥ ૩॥

સૃષ્ટં દેવ ચરાચરં જગદિદં બ્રહ્મસ્વરૂપેણ તે
સર્વં તત્પરિપાલ્યતે જગદિદં વિષ્ણુસ્વરૂપેણ તે ।
વિશ્વં સંહ્રિયતે તદેવ નિખિલં રુદ્રસ્વરૂપેણ તે
સંસિચ્યામૃતશીકરૈર્હર મહારિષ્ટં ચિરં જીવય ॥ ૪॥

યો ધન્વન્તરિસંજ્ઞયા નિગદિતઃ ક્ષીરાબ્ધિતો નિઃસૃતો
હસ્તાભ્યાં જનજીવનાય કલશં પીયૂષપૂર્ણં દધત્ ।
આયુર્વેદમરીરચજ્જનરુજાં નાશાય સ ત્વં મુદા
સંસિચ્યામૃતશીકરૈર્હર મહારિષ્ટં ચિરં જીવય ॥ ૫॥

સ્ત્રીરૂપં વરભૂષણામ્બરધરં ત્રૈલોક્યસંમોહનં
કૃત્વા પાયયતિ સ્મ યઃ સુરગણાન્પીયૂષમત્યુત્તમમ્ ।
ચક્રે દૈત્યગણાન્ સુધાવિરહિતાન્ સંમોહ્ય સ ત્વં મુદા
સંસિચ્યામૃતશીકરૈર્હર મહારિષ્ટં ચિરં જીવય ॥ ૬॥

ચાક્ષુષોદધિસમ્પ્લાવ ભૂવેદપ ઝષાકૃતે ।
સિઞ્ચ સિઞ્ચામૃતકણૈઃ ચિરં જીવય જીવય ॥ ૭॥

પૃષ્ઠમન્દરનિર્ઘૂર્ણનિદ્રાક્ષ કમઠાકૃતે ।
સિઞ્ચ સિઞ્ચામૃતકણૈઃ ચિરં જીવય જીવય ॥ ૮॥

ધરોદ્ધાર હિરણ્યાક્ષઘાત ક્રોડાકૃતે પ્રભો ।
સિઞ્ચ સિઞ્ચામૃતકણૈઃ ચિરં જીવય જીવય ॥ ૯॥

ભક્તત્રાસવિનાશાત્તચણ્ડત્વ નૃહરે વિભો ।
સિઞ્ચ સિઞ્ચામૃતકણૈઃ ચિરં જીવય જીવય ॥ ૧૦॥

યાઞ્ચાચ્છલબલિત્રાસમુક્તનિર્જર વામન ।
સિઞ્ચ સિઞ્ચામૃતકણૈઃ ચિરં જીવય જીવય ॥ ૧૧ ॥
ક્ષત્રિયારણ્યસઞ્છેદકુઠારકરરૈણુક ।
સિઞ્ચ સિઞ્ચામૃતકણૈઃ ચિરં જીવય જીવય ॥ ૧૨॥

રક્ષોરાજપ્રતાપાબ્ધિશોષણાશુગ રાઘવ ।
સિઞ્ચ સિઞ્ચામૃતકણૈઃ ચિરં જીવય જીવય ॥ ૧૩॥

ભૂભરાસુરસન્દોહકાલાગ્ને રુક્મિણીપતે ।
સિઞ્ચ સિઞ્ચામૃતકણૈઃ ચિરં જીવય જીવય ॥ ૧૪॥

વેદમાર્ગરતાનર્હવિભ્રાન્ત્યૈ બુદ્ધરૂપધૃક્ ।
સિઞ્ચ સિઞ્ચામૃતકણૈઃ ચિરં જીવય જીવય ॥ ૧૫॥

કલિવર્ણાશ્રમાસ્પષ્ટધર્મર્દ્ધ્યૈ કલ્કિરૂપભાક્ ।
સિઞ્ચ સિઞ્ચામૃતકણૈઃ ચિરં જીવય જીવય ॥ ૧૬॥

અસાધ્યાઃ કષ્ટસાધ્યા યે મહારોગા ભયઙ્કરાઃ ।
છિન્ધિ તાનાશુ ચક્રેણ ચિરં જીવય જીવય ॥ ૧૭ ॥

અલ્પમૃત્યું ચાપમૃત્યું મહોત્પાતાનુપદ્રવાન્ ।
ભિન્ધિ ભિન્ધિ ગદાઘાતૈઃ ચિરં જીવય જીવય ॥ ૧૮ ॥

અહં ન જાને કિમપિ ત્વદન્યત્
સમાશ્રયે નાથ પદામ્બુજં તે ।
કુરુષ્વ તદ્યન્મનસીપ્સિતં તે

સુકર્મણા કેન સમક્ષમીયામ્ ॥ ૧૯ ॥

ત્વમેવ તાતો જનની ત્વમેવ
ત્વમેવ નાથશ્ચ ત્વમેવ બન્ધુઃ ।
વિદ્યાહિનાગારકુલં ત્વમેવ
ત્વમેવ સર્વં મમ દેવદેવ ॥ ૨૦॥

ન મેઽપરાધં પ્રવિલોકય પ્રભોઽ-
પરાધસિન્ધોશ્ચ દયાનિધિસ્ત્વમ્ ।
તાતેન દુષ્ટોઽપિ સુતઃ સુરક્ષ્યતે
દયાલુતા તેઽવતુ સર્વદાઽસ્માન્ ॥ ૨૧॥

અહહ વિસ્મર નાથ ન માં સદા
કરુણયા નિજયા પરિપૂરિતઃ ।
ભુવિ ભવાન્ યદિ મે ન હિ રક્ષકઃ
કથમહો મમ જીવનમત્ર વૈ ॥ ૨૨॥

દહ દહ કૃપયા ત્વં વ્યાધિજાલં વિશાલં
હર હર કરવાલં ચાલ્પમૃત્યોઃ કરાલમ્ ।
નિજજનપરિપાલં ત્વાં ભજે ભાવયાલં
કુરુ કુરુ બહુકાલં જીવિતં મે સદાઽલમ્ ॥ ૨૩॥

ક્લીં શ્રીં ક્લીં શ્રીં નમો ભગવતે
જનાર્દનાય સકલદુરિતાનિ નાશય નાશય ।
ક્ષ્રૌં આરોગ્યં કુરુ કુરુ । હ્રીં દીર્ઘમાયુર્દેહિ સ્વાહા ॥ ૨૪॥

॥ ફલશ્રુતિઃ ॥

અસ્ય ધારણતો જાપાદલ્પમૃત્યુઃ પ્રશામ્યતિ ।
ગર્ભરક્ષાકરં સ્ત્રીણાં બાલાનાં જીવનં પરમ્ ॥ ૨૫॥

સર્વે રોગાઃ પ્રશામ્યન્તિ સર્વા બાધા પ્રશામ્યતિ ।
કુદૃષ્ટિજં ભયં નશ્યેત્ તથા પ્રેતાદિજં ભયમ્ ॥ ૨૬॥

॥ ઇતિ સુદર્શનસંહિતોક્તં અમૃતસઞ્જીવનધન્વન્તરિ સ્તોત્રમ્ ॥

Encoded and proofread by Sunder Hattangadi

*Amritasanjivani Dhanvantari Stotra 1*

pdf was typeset on March 1, 2024

Please send corrections to *sanskrit@cheerful.com*